Mazumdar Memorial College for Women
LIBRARY
Dakshineswar, Kolkata 35

Mazumdar Memorial College for Women
LIBRARY
Dakshineswar, Kolkata 35

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 1st Semester Examination, 2019

## SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः — 2×5 = 10

(क) सूर्यवंशस्य प्रथमः राजा कः आसीत् ?

(ख) कस्य आदेशेन गोरूपायाः पृथिव्याः गोदोहनम् अकरोत् ?

(ग) ''जगतः पितरौ वन्दे'' — अत्र 'जगतः पितरौ' कौ स्तः ?

(घ) 'रघुवंशम्' महाकाव्यस्य मुख्यः टीकाकारः कः ? तस्य टीकायाः नाम किम् ?

(ङ) पराक्रमेण दिलीपः केन सह उपमितः ?

(च) कियद्दूरं रघूणां राज्यं विस्तृतमासीत् ?

(छ) 'रघुवंशम्' इति महाकाव्ये कति सर्गाः सन्ति ?

(ज) सूर्यवंशवर्णनं कविः कीदृशं प्रयासं मन्यते ?

2. अधोलिखितेषु विषयमेकम् आश्रित्य टीका लेख्या। 5×1 = 5

(क) विजिगीषुः

(ख) ज्ञाने मौनम्

(ग) प्रणवश्छन्दः।

### SECTION-B

3. अधोलिखितेषु एकः प्रश्नः समाधेयः — 10×1 = 10

(क) 'कुमारसम्भवम्' इति महाकाव्यस्य नामकरणस्य स्वार्थकत्वं विचार्यताम्।

(ख) कुमारसम्भवस्य पञ्चमसर्गस्य पाठ्यविषयस्य कथासारो लेख्यः।

(ग) 'प्रकृतेः कविः कालिदासः' — उक्तिरियं व्याख्याताम्।

5×2 = 10

4. अधोलिखितेषु <u>श्लोकद्वयं</u> व्याख्येयम् –

(क) कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते॥

(ख) तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(ग) पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम्।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च॥

## SECTION-C

10×1 = 10

5. <u>एकः</u> प्रश्नः समाधेयः –

(क) 'नीतिशतकम्' इति ग्रन्थस्य रचयिता कः ? नीतिशतकमवलम्ब्य विद्यायाः प्रयोजनमालोच्यताम्।

(ख) नीतिशतककाव्ये मूर्खाणां चारित्रिक-वैशिष्टं कविना केन रूपेण उपस्थाप्यते तद्विषये स्वभाषया आलोच्यताम्।

5×1 = 5

6. अधोनिर्दिष्टं विषयम् <u>एकम्</u> आश्रित्य टीका लेख्या।

(क) विवेकभ्रष्टः

(ख) ज्ञानलवदुर्विदग्धम्

(ग) मृगतृष्णिका।

——×——